## **মৃচ্ছকটিকম্ (Marks 5)**

আচার্যশূদ্রকবিরচিতং দশাঙ্কবিশিষ্টপ্রকরণগ্রন্থম্ **মৃচ্ছকটিকম্** ইতি।"**মৃচ্ছকটিকম্**" ইতি নাটকস্য আদৌ শূদ্রকস্য পরিচয়ঃ বর্ণিত অস্তি।শূদ্রকঃ বিক্রমাদিত্য ইব প্রতিভাসম্পন্নঃ ঐতিহাসিকঃ পুরুষঃ আসীৎ।ভারতীয়াঃ বিদ্বাংসঃ অস্য সময়ং বিক্রমাব্দস্য প্রথমশতাব্দ্যাং মন্যন্তে।শূদ্রকঃ দণ্ডীবরাহমিহিরয়োঃ পূর্ববর্তী সিদ্ধ্যতি।অনেন অস্য সময়ঃ পঞ্চমশতাব্দ্যাং ন্যায়সঙ্গতং প্রতিভাতি।

শূদ্রকস্য মৃচ্ছকটিকে চারুদত্তবসন্তসেনয়োঃ প্রণয়বর্ণিতমস্তি।মৃচ্ছকটিকমিতি প্রকরণস্য -

নায়কঃ-চারুদত্তঃ।

নায়িকা-গণিকা বসন্তসেনা।

বিদূষকঃ-মৈত্রেয়ঃ।

চারুদত্তস্য বিবাহিতা পত্নী-ধূতা।

নাট্যকলাদৃষ্ট্যা মৃচ্ছকটিকং সুন্দরং সফলং চ নাটকং বিদ্যতে।সংস্কৃতসাহিত্যে সর্বপ্রথমম্ অস্মিন্নেব নাটকে রাজবংশাতিরিক্তঃ তথা নিম্নবর্গস্য সামাজিকঃ জনঃ নায়কঃ দৃশ্যতে।

মৃচ্ছকটিকমিতি প্রকরণে আচার্যশূদ্রকস্য রচনাশৈলী সরলা,প্রসাদগুণ- গুম্ফিতা চ অস্তি।স্থলে স্থলে নূতনঃ ভাবঃ প্রাপ্যতে।প্রকরণস্য মুখ্যরসঃ শৃঙ্গারঃ।নাট্যকারেণ ন্যায়ালয়স্য বর্ণনং কিয়ৎসুন্দরং কৃতমিতি।